# दशमोऽङ्कः ।

(ततः प्रविशति ब्राह्मणबटुभिर्दैत्यार्भकैश्च परिवृतोऽध्ययनशालास्थो विष्णुमित्रेण सह प्रह्लादः ।)

(प्रविश्य ।)

**विष्णुमित्रः** - अयि कुमार दैत्यार्भकेभ्यस्त्वयोपदिष्टं ज्ञानं शृण्वत आश्चर्यचयश्चुम्बति मे चित्तम्। ननु कस्ते गुरुः ।

**प्रह्लादः** - भगवन् कथयामि दर्शयामि वा ।

**विष्णुमित्रः** - (सहर्षम्।) कुमार दर्शयेश्चेत् कृतकृत्योऽहम् ।

**प्रह्लादः** - तथा । (इति स्मरणं नाटयति । क्षणान्तरे ।)

(आकाशे महःपुञ्जमवलोक्य सर्वेऽपि सविस्मयं पश्यन्ति । पुनः क्षणान्तरे ऊद्ध्र्वपुण्ड्रादिवैष्णवचिह्नैरलङ्कृतं वीणाविवशाङ्गुलिपल्लवं जटामुकुटमण्डितं वेदान्तपण्डितं खादवतरन्तं नारदं सर्वेऽपि पश्यन्ति ससम्भ्रममुत्तिष्ठन्ति च ।)

(ततः प्रविशति यथोपदिष्टो नारदः ।)

(प्रविश्य ।)

**नारदः** - (प्रह्लादं सस्मितं पश्यति ।)

**प्रह्लादः** - (सत्वरं पादयोर्निपतति ।)

**नारदः** - वत्स हरिभक्तिनिरतो भव ।

**प्रह्लादः** - तथास्तु । (इति उत्थाय ।) भगवन्निदमासनं तदलङ्करोतु भवान् ।

**नारदः** - (तथा करोति ।)

(सर्वेऽपि नमस्कृत्य तिष्ठन्ति ।)

**नारदः** - वत्स कथं स्मृतोऽहम् ।

**प्रह्लादः** - भगवन्भवद्दर्शनाकाङ्क्षापूरणाय भगवद्भक्तिरहस्यश्रवणाय च । तदनुगृह्णातु गुरुः ।

**नारदः** - तथा । (इति भगवद्ध्यानं नाटयित्वा सभक्तिप्रसरम् ।)

**एकोऽपि पञ्चधा यः सृष्टेः काले प्रतीयते लोके ।।**
**नित्यो विभुः स कृष्णो बहुलीलारूपसौख्यदः पायात् ।।१।।**

**प्रह्लादः** - भगवन् के ते पञ्चप्रकारास्तस्य भगवतो रूपस्य ।

**नारदः** - वत्स कथयामि शृणु।

**जडो जीवोऽन्तरात्मा च कूटस्थोऽक्षरसंज्ञितः ।।**
**तस्मात्परस्सलीलो यः पुरुषोत्तम ईरितः ।।२।।**

**चन्द्रशेखरः** - हन्त महर्षे उत्पत्तिविनाशशाली निश्चेतनो जडः कथं ब्रह्मरूप इति वक्तुं शक्यते ।

**नारदः** - (विहस्य ।) बटो कथमत्र ते सन्देहः । उत्पत्तिविनाशशालित्वं जडस्य लौकिकदृष्ट्या प्रतीयते वस्तुतस्तु तस्याविर्भावस्तिरोभावश्च भगवतस्सदंशमात्रकार्यत्वान्निश्चेतनत्वप्रतीतिः इदमेव श्रुतितात्पर्यवित्तमेन मुनिसत्तमेन कृष्णद्वैपायनेन लक्षणप्रमाणाधिकरणादिषु निरूपितम् । तत्सुविचारेण हृत्स्थं सन्देहमपाकुरु तदन्तरे ।

**समीरणः** - भगवन् नित्यदासो जीवस्स्वामिना पुरुषोत्तमेण कथमभिन्न इति वैष्णवैर्वक्तुं शक्यः ।

**नारदः** - वत्स भक्तिविवशेन त्वया युक्तमिवोक्तम् । वस्तुतस्त्वविचाररमणीयम्।

**समीरणः** - भगवन् कथमिव ।

**नारदः** - इत्थम् ।

**वेदैकगम्य ईशः स्वयंप्रकाशः स चास्ति तद्रूपः ।।**
**तत्प्रतिपाद्ये तस्मिन्नेकस्मिन्नेव कोऽस्ति जीवोऽन्यः ।।३।।**

**समीरणः** - भगवन् तर्हि कथं सेव्यसेवकभावस्स चोत्कृष्टापकृष्टयोर्भिन्नयोस्सम्भवति ।

**नारदः** - वत्स ।

**अग्निस्फुलिङ्गरीत्या यज्जीवोत्पत्तिः श्रुतौ मता ।।**
**तस्मादंशांशिभावेनोत्कृष्टत्वं च निकृष्टता ।।४।।**

**तेनाद्वैतं च तद्भक्तिर्वैदिकं कर्म सुस्थिरम् ।।**
**वैदिकानां वैष्णवानां विनिन्द्या द्वैतभावना ।।५।।**

**प्रह्लादः** - भगवन् किंस्वरूपोऽन्तरात्मा तेन च किं कार्यम्।

**नारदः** - वत्स शृणु ।

**सच्चिदानन्दरूपोऽपि व्यापकोऽणुमितः सदा ।।**
**साक्षी सर्वगुहाविष्टो मुक्तोऽसङ्ख्यातरूपवान् ।।६।।**

**विष्णुमित्रः** - भगवन् ममास्ति किञ्चिद्वक्तव्यम् ।

**नारदः** - वत्स कथय कथय ।

**विष्णुमित्रः** - भगवन्नेतद्रूपत्रयं परस्येति गुरुणा निरूपितम् । तच्च व्यवहार्यं परस्त्वग्राह्योऽव्यवहार्यश्च। तत्कथं परस्य रूपत्रयमित्यवधारणीयम्।

**नारदः** - वत्स साधुस्ते प्रश्नः । शृणु तावत्कथयामि।

**अग्राह्योऽव्यवहार्यश्च लौकिकैः करणैः परः ।।**
**अलौकिकेन्द्रियैर्ग्राह्यस्स्वेच्छया व्यवहार्यता ।।७।।**

एतच्छ्रुतिरहस्यं कृष्णद्वैपायनेनेक्षत्यधिकरणे स्फुटं प्रपञ्चितं तेनावगच्छ।

**प्रह्लादः** - भगवन् कूटस्थस्य स्वरूपं वेत्तुमिच्छामि।

**नारदः** - (साह्लादम् ।) वत्स शृणु ते कथयामि।

**कूटस्थोऽक्षरसंज्ञो भूतादीनां स कारणं नित्यः ।।**
**वेदादीनां स्थानं गणितानन्दः पदं परस्य विभुः ।।८।।**

**तज्ज्ञानाद्ब्रह्मत्वं प्राकृतसम्बन्धमोक्षतो ज्ञानी ।।**
**तस्मिंल्लयमाप्नोतीत्येवं मार्यादिको लयो वेदे ।।९।।**

**चन्द्रशेखरः** - मुने लयान्तरं किमस्ति वेदे ।

**नारदः** - (सस्मितम् ।) साङ्गवेदाध्येतुस्तवास्ति कथं सन्देहः ।

ब्रह्मवल्ल्याद्युपनिषत्सु ज्ञानिनो ब्रह्मभावानन्तरं परप्राप्तिरूपः पुष्टिमोक्षस्स्पष्टतया गीयते। तदेव च निःसंदिग्धीकृतमानन्दमयाधिकरणे फलाध्याये च वेदार्थपरायणेन बादरायणेन।

**शाण्डिल्यः** - (ससम्भ्रमम् ।) मुने भगवत्कृपापात्रीभूतेन भवता मोक्षदात्री भक्तिः कथं विस्मृता ।

**नारदः** - (सप्रेम ।) अयि मित्र नाहं विस्मरामि क्रमेण कथयिष्ये ।

**प्रह्लादः** - अयि भगवन् ब्रह्मभावानन्तरं कथं परप्राप्तिः । किंस्वरूपा सेति विविदिषा समुज्जृम्भते ।

**नारदः** - (सप्रेमस्मितम् । रोमाञ्चमभिनीय ।) वत्स चिरञ्जीव । एवमेवास्तु नित्यं ते मतिः ।

**प्रह्लादः** - तथाऽस्तु । (इति नमस्करोति ।)

**नारदः** - वत्स त्वमेकाग्रधिया शृणु कथयामि रहस्यम् ।

**अक्षरोपासनाप्राप्तं ब्रह्मत्वमवलम्बते ।।**
**स कदाचिद्धरीच्छातः पुष्टावङ्गीकृतो भवेत् ।।१०।।**

**तदा तद्धृदये गाढप्रेमोत्पत्तिः प्रजायते ।।**
**तेन स्वहृद्गुहायां स साक्षरं पुरुषोत्तमम् ।।११।।**

**सलीलं पश्यति प्रेष्ठं किञ्च तत्प्राप्तिसिद्धये ।।**

**मनोरथं प्रकुरुते तेन तीव्रानलोपमः ।।**
**विरहो जायते देहप्राणेन्द्रियविमर्द्दकः ।।१२।।**

**तदा तद्रक्षणायाशु प्रविश्य पुरुषोत्तमः ।।**
**तद्देहं पक्षिरूपेणाक्षररूपं कृपानिधिः ।।१३।।**

**लीलाप्रवेशयोग्यत्वं सम्पादयति सौख्यदम् ।।**
**ततोऽस्माल्लोकतो गत्वा लीलाप्राप्त्युन्मुखो भवेत् ।।१४।।**

**तदा कलिन्दजा देवी भगवत्पादरेणुभिः ।।**
**तल्लीलाविग्रहं कृत्वा तं लीलास्थं करोति सा ।।१५।।**

अथ लीलासुखं भुङ्क्ते तद्रूपस्सर्वदा विभोः ।।
न बिभेति कुतो लीलानन्दनिर्भरचेतसा ।।१६।।
लीलानन्दं हरेर्बि[भ्र]न्न बिभेति कुतश्चन ।।१६।। [/]

उत्तमोत्तममेतद्धि लीलाकैवल्यमद्भुतम् ।।
पुष्ट्यङ्गीकारतः प्राप्यं श्रुतिभिः परिकीर्त्तितम् ।।१७।।

**प्रह्लादः** - (सप्रेमगद्गदाक्षरम् ।) गुरो लीलाकैवल्यमिदं भवत्सदृशानां भागवतानां कृपैकलभ्यम् । परं पुरुषोत्तमस्वरूपं याथार्थ्येनावगन्तुमिच्छामि भवत्कृपाबलेन।

**नारदः** - (सप्रेमाश्रु । साभिनन्दम् ।) वत्स किं वदामि भगवदनुग्रहभाजनं त्वं सभाजनं तारयसि। पुरुषोत्तमस्वरूपं गोप्यमपि तद्भक्तं त्वामुपदिशामि । सप्रेमहृदयेन शृणु ।

**प्रह्लादः** - (सप्रेमाश्रु साञ्जलिबन्धस्तिष्ठति ।)

**नारदः** -

वाङ्मनोगोचरातीतो वैभवो यस्य सर्वदा ।।
अचिन्त्यानन्तशक्तिश्च निस्सीमानन्द ईश्वरः ।।१८।।

सच्चिदानन्दरूपोऽपि सच्चिदानन्दधर्मवान् ।।
लीलासामग्र्यभिन्नो यो नित्यलीलायुतस्सदा ।।१९।।

कोटिकन्दर्पलावण्यो भक्तभावात्मकः प्रभुः ।।
रसिको भोगचतुरः समग्ररस एव सः ।।२०।।

इच्छामात्रेण यः कर्त्ता भर्त्ता लोकस्य शाश्वतः ।।
भक्तार्थमवताराणां धर्त्ता हर्त्ताऽशुभस्य सः ।।२१।।

व्यामोहकोऽसुराणां च तद्धन्ताऽक्लिष्टकर्मकृत् ।।
स्वतन्त्रो निर्गुणः श्रीमानलौकिकगुणाकरः ।।२२।।

यस्यावताराः कर्माणि नामान्यपि बहून्यहो ।।
नित्यानि सूरिगेयानि शमलक्षपणानि च ।।२३।।

**इत्थं दिग्दर्शिता यस्य स शुद्धः पुरुषोत्तमः ।।**
**प्रेमैकलभ्यः पूर्णोऽसौ सुखदः सर्वदा सताम् ।।२४।।**

**प्रह्लादः** - (सभक्तिप्रसरम् ।) भगवन्पुरुषोत्तमज्ञानदानेन कृतार्थीकृतोऽहम् । (इति दण्डवत्प्रणमति ।)

**नारदः** - (तच्छिरसि करं निधाय सप्रेम ।) वत्स सुखी भव हरिभक्तिवृद्धिरस्तु।

**प्रह्लादः** - तथास्तु । (इति उत्थाय साञ्जलिबन्धस्तिष्ठति ।)

**चन्द्रशेखरः** - हन्त हन्त मुने कीदृशोऽयं मोक्षः । तस्य बहुसामग्रीघटितत्वाद्द्वैतवत्त्वं मायिकत्वं वा सकामः परः । जीवश्च तादृशस्तदेतन्मोक्षत्वेन कथं व्यवहर्त्तुं शक्यते ।

**नारदः** - (साकूतस्मितम् ।) हन्त वेदार्थाभिज्ञस्य सर्वज्ञस्य तव दैत्यबालक-व्यामोहकः कीदृशोऽयं प्रश्नः । शृणु कथयामि ।

**सुवर्णशालभञ्ज्यां यद्बाहुल्यं दृश्यते स्फुटम् ।।**
**अङ्गभेदेन तत्रास्ति सुवर्णत्वेन नो भिदा ।।२५।।**

**तथास्ति लीलाकैवल्यं भेदभावविवर्जितम् ।।**
**उत्कटानुग्रहाल्लभ्यं कृष्णस्य परमात्मनः ।।२६।।**

**प्रह्लादः** - भगवन्भगवत उत्कटभावभाजनं जनः कथं भवति ।

**नारदः** - (सहर्षम् ।) वत्स सर्वलोकोद्धारकस्ते प्रश्नः कथयाम्युत्कटानुग्रहस्य हेतुम् ।

**साधनसाध्यता वेदैः कथ्यते परमात्मनः ।।**
**भक्त्या सम्प्राप्यते पुष्टेर्जनैस्स फलरूपया ।।२७।।**

**प्रह्लादः** - भगवन्यदि भक्तेः फलरूपत्वं तर्हि ज्ञानसाधनत्वं कथं श्रूयते ।

**नारदः** -

**भक्तिर्बहुविधा लोके संवित्संसाधिका परम् ।।**
**फलरूपा तु सा भक्तिः पुष्टिस्सर्वसुखप्रदा ।।२८।।**

अत एव प्रत्नेन देवकीगर्भरत्नेन यत्नेनार्जुनं बोधयता गीतायामुक्तम् ।

**ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।।**
**समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ।।[५४]।।**

[श्रीमद्-भगवद्गीता-अष्टादशाध्यायः।]

**प्रह्लादः** - भगवन्पुष्टिभक्तेस्स्वरूपं ज्ञातुमिच्छामि ।

**नारदः** - (सवात्सल्यम् ।) साधु वत्स साधु पुष्टिभक्तेस्स्वरूपं कथयामि शृणु ।

**प्रेमात्मिका दृढा नित्या फलहेतुविवर्जिता ।।**
**निरोधफलदा शीघ्रं पुष्टिभक्तिरिति स्मृता ।।२९।।**

**प्रह्लादः** - भगवन्केन साधनेन साध्येयम् ।

**नारदः** - वत्स भगवद्भक्तानुषङ्गैकलभ्या ।

**प्रह्लादः** - तर्हि भगवद्भक्तानां स्वरूपमुपदिशतु गुरुः ।

**नारदः** - (सानन्दम् ।) वत्स शृणु कथयामि ।

**परमप्रेमसंयुक्तस्तुष्टस्सर्वसुहृत्सदा ।।**
**दयोदधिस्सदानन्दो निर्वैरस्समदृक्प्रभुः ।।३०।।**

**भगवद्गुणगानोत्को भगवद्भावपूरितः ।।**
**भगवत्सेवने सक्तः सत्यवाक् दम्भवर्जितः ।।३१।।**

**श्रद्धालुर्धर्मशीलश्च सदाचारपरायणः ।।**
**भगवद्भक्तसुस्निग्धो रसिकस्त्यागतत्परः ।।३२।।**

**कामादिभिरनाविद्धो विनयी शान्तमानसः ।।**
**मानानपेक्षस्सर्वज्ञो निर्भयो मितवाक् शुचिः ।।३३।।**

**परोपकारनिरतः प्रसादोन्मुखमानसः ।।**
**स्मितास्यस्तेजसा युक्तो भगवच्चिह्नचिह्नितः ।।३४।।**

**निःस्पृहस्तीर्थसंसेवी गुरुभक्तः क्षमाकरः ।।**
**भगवद्भुक्तवस्तूनामेव भोक्ता सुकर्मकृत् ।।३५।।**

**अन्याश्रयपरित्यागी सद्ग्रन्थाभ्यासकृत्सुधीः ।।**
**मायामोहतिरस्कर्ता मुक्तिदो भक्तिदः सताम् ।।३६।।**

**भगवद्विरहादित्यतप्तान्तःकरणः पुनः ।।**
**भगवत्सङ्गसम्भूतनिस्सीमानन्दभुक्सदा ।।**
**इत्यादिगुणसंयुक्तः पुष्टिभक्तः प्रकीर्तितः ।।३७।।**

**प्रह्लादः** - (साष्टाङ्गं प्रणम्य ।) अयि भगवन्कृपाम्भोधे भवद्विधानां भागवतानां गुरूणां कृपाप्रभावादेवेदृशोऽधिकारः सिद्ध्यति । मादृशां ग्राम्यबुद्धीनां क्वास्त्येतल्लेशोऽपि।

**नारदः** - नहि नहि वत्स त्वं योग्योऽसि त्वत्प्रभावेणैव कुलं तरिष्यति ।

**प्रह्लादः** - भगवन् भवत्कृपाप्रभावेण किमसम्भावनीयम् ।

**विष्णुमित्रः** - भगवन्माया नाम कीदृशः पदार्थः । सत्पदार्थश्चेद्ब्रह्माभिन्नो भिन्नो वा। ब्रह्माभिन्नश्चेद्विनाशशालित्वं मुमुक्षुहेयत्वं च कथम् । तद्भिन्नत्वे त्वद्वैतश्रुतिविरोधश्च। असत्पदार्थश्चेत्प्रातिभासिको वाचनिको वा।

**नारदः** - अयि विष्णुमित्र मायास्वरूपाज्ञानादेतच्छङ्कोदयः । वस्तुतस्तु ।

**भगवन्मुख्यशक्तित्वादभिन्नत्वं न तुच्छता ।।**
**तदिच्छावशगा बन्धे तस्माद्धेया न नश्वरा ।।३८।।**

**ज्ञानेन तस्याः सम्बन्धो नाश्यो नास्ति स्वयं तथा ।।**
**क्वास्ति शङ्कोदयो विप्र तदा मनसि चिन्तय ।।३९।।**

**विष्णुमित्रः** - (साञ्जलिबन्धम् ।) गतो मे मोहः कृतार्थीकृतश्च मन्मित्रं कुमारः प्रह्लादः ।

**प्रह्लादः** - भगवन्नेवमेव यदाह विष्णुमित्रः ।

**चन्द्रशेखरः** - कुमार यदा यः कश्चिद् ब्राह्मणो यद् वदति तदा तदेव सत्यमिति मन्तव्यम् ।

**नारदः** - (किञ्चित्सक्रोधमिव ।) नहि नहि यत्सतां सम्मतं तदेव सत्यमिति मन्तव्यम्।

(इति विलोचने निमील्य ध्यानं नाटयति ।)

(नेपथ्ये महःपुञ्जः । सविस्मयं सर्वेऽपि पश्यन्ति ।)

**नारदः** - (अक्षिणी उन्मील्य नेपथ्याभिमुखमवलोक्य। सहर्षम् ।) हन्त कृतकृत्योऽहम् । यतः ।

**वेदवेदाङ्गवेदान्तपारगो भगवत्कला ।।**
**जैमिन्यनुगतः श्रीमान्द्वैपायन इहागतः ।।४०।।**

(ततः प्रविशति जैमिनिनाऽनुगम्यमानो भगवान् द्वैपायनः ।)

(प्रविश्य ।)

**द्वैपायनः** - (पदान्तरं गत्वा अवलोक्य च ।) अयेऽयं देवर्षिर्नारदः । भगवद्भक्तः प्रह्लादश्च तदुपसर्पामि। (इति उपसर्पति।)

(सर्वेऽपि ससम्भ्रमं साञ्जलिबन्धं समुत्तिष्ठन्ति ।)

**द्वैपायनः** - (उपसृत्य सस्मितम् ।) देवर्षे नारद नमस्करोमि ।

**नारदः** - (सस्मितम् ।) भगवन् द्वैपायन नमस्करोमि ।

**जैमिनिः** - देवर्षे नमस्करोमि ।

**नारदः** - धर्माचार्य नमस्करोमि ।

**प्रह्लादः** - (उभयोः पादयोः प्रणमति ।)

**उभौ** - ( साभिनन्दम् ।) वत्स चिरञ्जीव हरिभक्तिवृद्धिरस्तु ।

**प्रह्लादः** - तथास्तु । (इति उत्तिष्ठति ।)

**नारदः** - भगवन्निदमासनं समलङ्करोतु भवान् सशिष्यः ।

**द्वैपायनः** - (तथा करोति ।)

(प्रह्लादादयस्सर्वेऽपि सविनयं साञ्जलिबन्धास्तिष्ठन्ति ।)

**द्वैपायनः** - देवर्षे कथमहं स्मृतः ।

**नारदः** - भगवन्बादरायण मदुक्तौ कस्यचिदस्ति सन्देहस्तन्निर्णयार्थं स्मृतो भवाँस्तद्यातायातप्रयासः क्षन्तव्यः ।

**बादरायणः** - (सस्मितम् ।) नहि नहि भवत्सदृशानां भागवतानां ज्ञानदातॄणां दर्शनमेव फलरूपम् । कुतः प्रयासः । परं भवदुक्तिं श्रोतुमिच्छामि ।

**नारदः** - (प्रह्लादं भ्रूसंज्ञया प्रेरयति ।)

**प्रह्लादः** - (''**एकोऽपि पञ्चधा**'' इत्यारभ्य **मायास्वरूप**-निरूपणान्तं सर्वमनुवदति ।)

**बादरायणः** - (सश्लाघम् । सशिरःकम्पम् ।) भगवन् परावरज्ञ भवदुक्तिस्तु ।

**वेदवेदाङ्गवेदान्तसारभूता स्फुटाऽथ च ।।**
**भक्तिमुक्तिप्रदा तत्र सन्देहोऽज्ञानमूलकः ।।४१।।**

**नारदः** - (सस्मितम् ।) भगवन्कृतार्थीकृतोऽहम् । वत्स प्रह्लाद किमपि प्रष्टव्यं चेदवसरोऽयम् ।

**प्रह्लादः** - यथाज्ञा गुरोः । भगवन् वेदार्थसारज्ञ बादरायण वेदो नाम कः पदार्थः किँल्लक्षणः ।

**बादरायणः** - वत्स साधु पृष्टं शृणु कथयामि ।

**कृष्णनिःश्वासरूपोऽयं षडङ्गो ब्रह्मरूपकः ।।**
**त्रैवर्णिकोऽधिकार्यस्य किञ्चास्त्युपनिषच्छिरः ।।४२।।**

**मन्त्रेण ब्राह्मणेनार्थवादेनाख्यानतश्च यः ।।**
**लक्षितो ऋग्यजुःसामप्रकारेण सनातनः ।।४३।।**

**प्रह्लादः** - भगवन्मन्त्रब्राह्मणार्थवादोपाख्यानानां क्वोपयोगः ।

**बादरायणः** - (भ्रूसंज्ञया जैमिनिं प्रेरयति ।)

**जैमिनिः** -

**विधेयसाधको द्रव्यदेवतास्मारकस्तथा ।।**
**मन्त्रः प्रकीर्त्तितो वेदविद्भिः सद्भिर्दयापरैः ।।४४।।**

**विधिवाक्यसमूहोऽसौ ब्राह्मणं विनियोजकम् ।।**
**सम्मुखीकरणं चार्थवादे प्राशस्त्यबोधनात् ।।४५।।**

**तथाख्यानानि नित्यानि साधकानि विशेषतः ।।**
**कर्मसिद्धिस्ततो वेदात्ततः सुष्ठुफलानि हि ।।४६।।**

**प्रह्लादः** - भगवन् भगवद्गीतायां भगवतोक्तम् । "**वेदैश्च सर्वैरहमेव वेद्यः**" [१५.१५] इति । अत्र तूक्तप्रकारेण तस्य कर्मसाधकत्वं भातीति । कथमविरोधः ।

**बादरायणः** - वत्स सम्यक्ते प्रश्नः शृणु कथयामि ।

**काण्डद्वययुतो वेदो रूपद्वयनिरूपकः ।।**
**क्रियारूपं तु पूर्वस्मिञ्ज्ञानरूपं तथोत्तरे ।।४७।।**

**रूपद्वयं भगवतस्तेन सिद्धार्थता मता ।।**
**अनश्वरत्वं तेनैव कर्मणश्च फलस्य हि ।।४८।।**

**प्रह्लादः** - (प्रणम्य ।) गतो मे सन्देहः ।

**विष्णुमित्रः** - भगवन् ममास्ति महान् सन्देहः ।

**जैमिनिः** - तर्हि कथय कथय ।

**विष्णुमित्रः** - भगवन्कर्मफलयोस्साक्षात्परम्पराभेदेनास्मत्कृतिसाध्यत्वादर्थवादानां स्वार्थे प्रामाण्याभावादुपाख्यानानां वर्ण्योत्तरकालीनत्वात्कथं सिद्धार्थत्वम् ।

**जैमिनिः** - (सस्मितम् ।) विप्र वेदार्थतात्पर्यपर्यालोचनाभावादियं शङ्कोदेति । शृणु शङ्कां वारयामि ।

**विष्णुमित्रः** - (साञ्जलिबन्धस्तिष्ठति ।)

**जैमिनिः** -

**आधिभौतिकवस्तूनां साध्यता दृश्यते परम् ।।**
**तत्राधिदैविकं नित्यं यथा प्रतिकृतौ हरेः ।।४९।।**

**तत्सायुज्यात्कर्मसिद्धिः फलं तेनैव शाश्वतम् ।।**
**तस्मान्न कृतिसाध्यत्वं कर्मणश्च फलस्य च ।।५०।।**

**प्रामाण्यमर्थवादानां न स्वार्थ इति या मतिः ।।**
**भ्रान्तिमूला यतः शब्दात्तथार्थो न प्रतीयते ।।५१।।**

**अर्थः शब्दस्य शक्यार्थोऽहेयो मुख्यो यतो द्विज ।।**
**वदनं वाद उक्त्यर्थस्तेन स्वार्थे प्रमाणता ।।५२।।**

**वर्ण्यानां ब्रह्मरूपत्वादुपाख्यानेषु नित्यता ।।**
**तेन सिद्धार्थता वेदे सिद्धसिद्धैः प्रदर्शिता ।।५३।।**

**तस्माज्ज्ञानोपयोगित्वं मोक्षदत्वं च कर्मणः ।।**
**तथा ज्ञाने मोक्षदत्वं कर्मौपयिकता मता ।।५४।।**

**परस्परोपकारित्वमैकशास्त्र्यं तथा द्वयोः ।।**
**यस्माद्वेदार्थ एवास्ति विषयोऽद्वितयस्य सः ।।५५।।**

**विष्णुमित्रः** - भगवन्मोहपङ्कक्षालनेन समुज्ज्वलितोऽहम् । (इति प्रणमति ।)

(नेपथ्ये ।)

**भस्मावगुण्ठितो दम्भी क्रोधास्यः कटुवाक्कृशः ।।**
**निश्छिद्रस्योर्द्ध्वपुण्ड्रस्य धर्त्ता ........ आगतः ।।५६।।**

(ततः प्रविशति यथानिर्दिष्टो ..... ।)

...... - (प्रविश्य । सर्वतोऽवलोक्य ।) आः के ते सर्वज्ञे मयि जाग्रति स्वपाण्डित्यं प्रगल्भयन्ति । भो भोः सभ्याः शृणुत मद्वाक्यम् ।

**विद्वानस्मि च शुक्लवृत्तिनिपुणो मीमांसकाग्रेसरः**
**किञ्चाहं किल कुण्डमण्डपविधौ दक्षोऽङ्कविद्यासु च ।।**
**काव्यं कर्तुमतीव बुद्धिविसरोऽस्ति....**

**विष्णुमित्रः** - (निपुणं निरूप्य ।) आः ज्ञातः ज्ञातः ।

**....एवं विजल्पन्सदा**
**कृत्याकृत्यविवेकशून्यहृदयः शुक्लो द्विपादः पशुः ।।५७।।**

...... - (श्रुत्वा ।) (दन्तान्निष्पीड्य सक्रोधम् ।) आः कुमारमित्र विप्रापसद दर्शयिष्ये मदवधीरणायाः फलम् । अधुनैव गत्वा कथयिष्ये महाराजं हिरण्यकशिपुं यत्कुमारस्य बुद्धेः परपक्षमार्गसञ्चरणे मार्गप्रदर्शको विप्रापसदो विष्णुमित्र इति ।

(इति निष्क्रान्तः ।)

(सर्वेऽपि सभ्या विहस्य तूष्णीं तिष्ठन्ति ।)

**बादरायणः** - देवर्षे स्वाश्रमं गन्तुमिच्छामि ।

**नारदः** - यथाभिलषितं भगवते । अहमपि सहैवागन्तुमिच्छामि ।

**बादरायणः** - (सस्मितम् ।) तर्ह्यस्माकं महाँल्लाभः ।

**नारदः** - वत्स प्रह्लाद वयं सर्वेऽपि गन्तुमिच्छामः ।

**प्रह्लादः** - (किञ्चिन्म्लानमुखः ।) यथाभिलषितं भगवद्भ्यः । (इति दण्डवत्प्रणमति ।)

**ते सर्वेऽपि** - सुखी भव कृष्णभक्तिवृद्धिरस्तु ।

(इति निष्क्रान्ताः ।)

**विष्णुमित्रः** - कुमार प्रह्लाद त्वत्प्रसङ्गेणाद्य त्रिवेणीस्नानमिव संवृत्तम् । नो चेदस्माकं कुतो महत्समागमः ।

**प्रह्लादः** - विष्णुमित्र अहं कियानेतत्सर्वं गुरोर्नारदस्य प्रभावेणाभूत् ।

**विष्णुमित्रः** - (सविस्मयम् ।) अयि कुमार कदा ते गुरुर्नारद उपदेशको जातः ।

**प्रह्लादः** -

**पुरा पिता मे तपसे प्रतिष्ठितस्-**
**तदा सुरेन्द्रेण हृताः समृद्धयः ।।**
**हृता च माता क्रथनाय गुर्विणी**
**तदा प्रदृष्टा गुरुणा गुणाब्धिना ।।५८।।**
**विमोचिता स्वाश्रममण्डलं हृता**
**स्थिताऽथ मात्रे मम तत्र निर्मलम् ।।**
**ज्ञानं प्रदत्तं मदनुग्रहाय तद्-**
**धृतं मया चेतसि भक्तिरव्यया ।।५९।।**
**इत्थं गुरुर्मे भगवानभूत्तदा**
**ज्ञानं च भक्तिश्च कृता स्थिरा परम् ।।**

**स्त्रीभावतो मातुरभूत्तिरोहितं**
**ज्ञानं हि भक्त्या सहितं सुदुर्लभम् ।।६०।।**

**विष्णुमित्रः** - कुमार भगवद्भक्तेन त्वया कृतार्थीकृतं दैत्यकुलम् ।

**ब्राह्मणबटवः** - कुमार सत्यमाह विष्णुमित्रः ।

(सर्वेऽपि परस्परमवलोक्य । सस्मितम् ।)

कुमार वयं सर्वे स्वाश्रमान् गन्तुमिच्छामः ।

**प्रह्लादः** - (सस्मितम् ।) यथाभिलषितं वन्द्येभ्यः । बटवः प्रणमामि ।

**ते सर्वेऽपि** - सुखी भव शत्रुक्षयोऽस्तु ।

(इति निष्क्रान्ताः ।)

(नेपथ्ये ।)

**दौवारिकसहायोऽयं हिरण्यकशिपुः प्रभुः ।।**
**प्रह्लादचेष्टां सन्द्रष्टुं वाणीं श्रोतुं समागतः ।।६१।।**

(ततः प्रविशति यथानिर्दिष्टो हिरण्यकशिपुः ।)

(प्रविश्य ।)

**हिरण्यकशिपुः** - भद्र प्रचारचतुर क्वास्ति गुरोरध्ययनशाला तत्प्रदर्शय ।

**दौवारिकः** - इत इतः । (पदान्तरं गत्वा ।) महाराज इयमध्ययनशाला ।

**हिरण्यकशिपुः** - (स्वल्पस्वरेण ।) भद्र त्वमत्रैव तिष्ठ अहं तावत्कुमारस्य चेष्टां द्रष्टुं गच्छामि ।

**दौवारिकः** - (तथा करोति ।)

**हिरण्यकशिपुः** - (शनैः शनैः तूष्णीं दूरं तिष्ठति ।)

**प्रह्लादः** - विष्णुमित्र त्वमेहि विष्णुपूजां निर्वर्त्तयामि ।

**विष्णुमित्रः** - यथाभिलषितं कुमाराय ।

**प्रह्लादः** - (विष्णुपूजां कृत्वा ।) भो भो वयस्याः कथमायुषो वैयर्थ्यं कर्तुं तूष्णीं स्थिताः ।

**कृष्ण कृष्णेति कृष्णेति परमात्मन्नितीर्यताम् ।।**
**सफलीक्रियतां जन्म भगवद्भजनान्निजम् ।।६२।।**

**हिरण्यकशिपुः** - (सक्रोधाडम्बरं विलोचने विस्फार्य क्ष्वेडां कृत्वा वेगादुत्प्लुत्य ।) आः पाप पुत्रापसद दैतेयचन्दनवनकुठार सहजशत्रो कर्णहालाहलं श्रुत्वा ते वाणीसन्निकृष्टं च दृष्टं ते दुश्चेष्टितं कष्टं बहुभिर्यातनाभिः शिक्षितस्यापि न जाता ते सुबुद्धिस्तदद्य क्षणं तिष्ठ । दर्शयामि ते दुश्चेष्टितस्य फलम् ।

(इति खड्गं ग्रहीतुं दौवारिकेण सह निष्क्रान्तः ।)

**प्रह्लादः** - (सस्मितम् । निर्भयः । ''**कृष्ण कृष्ण**'' इत्यादि पठति ।)

**विष्णुमित्रः** - (सभयकम्पं सोच्छ्वासम् ।) कुमार अधुना किं भविष्यति । अहह आवां क्व गच्छावः । महद्व्यसनं प्राप्तम् ।

**प्रह्लादः** - (सस्मितम् ।) विष्णुमित्र ज्ञानिनस्ते अलमलं कातर्येण ।

**ब्रह्माण्डरक्षको यस्य रक्षकस्तस्य किं भयम् ।।**
**मृत्योरपि भयं नास्ति किम्भयं तुच्छविक्रमात् ।।६३।।**

(इति पुनः सः ''**कृष्ण कृष्ण**'' इत्यादि पठति ।)

**विष्णुमित्रः** - (सभयकम्पं तूष्णीं तिष्ठति ।)

**प्रह्लादः** - (स्वगतम् ।) दृढाश्रयाभावात् भृशं बिभेति विष्णुमित्रोऽयम् । (प्रकाशम् ।) हन्त विष्णुमित्र ब्राह्मणस्य ते नैसर्गिकमिदं कातर्यं तदलमलमत्र स्थित्या गच्छ स्वाश्रमम् ।

**विष्णुमित्रः** - (सत्वरमुत्थाय ।) कुमार समुज्जीवितोऽहम् । (उच्चस्वरेण।) भद्र मकरानन इत एहि एहि । कुमारसविधं तिष्ठ । (इति सत्वरं निष्क्रान्तः ।)

**अनुचरः** - (तथा करोति ।)

**प्रह्लादः** - (सप्रेमस्मितम् । ''**ब्रह्माण्डरक्षको यस्य**'' इत्यादि पठति ।)

**दैत्यार्भकाः** - (स्वगतम् ।) हन्त विष्णुमित्रोऽपि गतस्तदधुनात्र स्थित्वा किं प्रचण्डस्य महाराजस्य दण्डपात्रीभविष्यामस्तदत्र स्थातुं नोचितं

गृहगमनमेव श्रेयः । (प्रकाशम् ।) अयि वयस्य कुमार प्रचण्डो महाराजः किं करिष्यतीति न जानीमस्तद्गृहं गन्तुमिच्छामः ।

**प्रह्लादः** - (''**ब्रह्माण्डरक्षको यस्य**'' इत्यादि पुनः पठन् भ्रूसंज्ञयाऽनुमनुते ।)

(दैत्यार्भकाः सभयं सत्वरं निष्क्रान्ताः ।)

**अनुचरः** - (स्वगतम् ।) अहो अर्भकस्य धैर्यं निष्ठा च सुदृढा विष्णौ । नूनमेतद्द्वारैव महाराजस्य हिरण्यकशिपोः क्षयो भवितेति प्रतिभाति । (इति शिरो धूनयति ।)

(नेपथ्ये ।)

**रत्नत्सरुं दृढतरं निशिताश्रिघोरं**
**प्रत्यर्थिकृन्तनविधौ क्रकचोपमं तम् ।।**
**चण्डांशुचण्डकरसङ्घसमुज्ज्वलं द्राक्**
**स्तम्भे जघान स भृशं दितिजः स्वखड्गम् ।।६४।।**

(ततः क्षणान्तरे ।)

**ब्रह्माण्डखण्डनपरश्वध उग्र उच्चैर्-**
**दैत्येन्द्रसङ्घहृदयाद्रिविभेदवज्रम् ।।**
**दिग्दन्तिनस्सगिरिकूटधरान् समुद्रान्**
**संक्षोभयन् ध्वनिरयं शृणुत प्रवृद्धः ।।६५।।**

(पुनः क्षणान्तरे ।)

**भित्त्वा स्तम्भं दानवेन्द्रं निहन्तुं**
**धृत्वा रूपं नारसिंहं स कृष्णः ।।**
**कृत्वा घोरं ध्वानमुच्चैः कृपाब्धिस्-**
**तप्त्वा क्रोधादागतस्सौख्यदोऽसौ ।।६६।।**

(पुनः क्षणान्तरे । महान् कलकलः ।)

(ततः प्रविशति बृहद्वपुर्भयानकास्यः अश्मकूटः ।)

(प्रविश्य ।)

**अश्मकूटः** - (सर्वतोऽवलोक्य ।) (जनान्तिकम् ।)अये कथमद्य सर्वं भयानकं पश्यामि क्व गताश्च सर्वे दैत्याः । अर्भकमपि न पश्यामि तत्किं युद्धार्थं क्वापि सर्वे गता आहोस्वित्कस्यचिद्भयेन निलीनास्तन्न जानेऽहम् । किं बहुना मन्मित्रं वज्रकूटोऽपि न जाने मामनापृच्छ्य क्व गतः । (इति क्षणं विमृश्य ।) भवतु शब्दापयामि । (इति हस्तमुदस्योच्चस्वरेण ।) रे रे वज्रकूट क्वासि क्वासि ।

(नेपथ्ये ।)

अयमहमागतः ।

(ततः प्रविशति तथाभूतो वज्रकूटः ।)

**वज्रकूटः** - (प्रविश्य ।) (सभयसम्भ्रमं स्खलनं नाटयति ।)

**अश्मकूटः** - मित्र समाश्वसिहि समाश्वसिहि । (इति तमुत्थापयति ।)

**वज्रकूटः** - (समाश्वस्य ।) वयस्य किं भणामि । भयात्कम्पते मद्धृदयं समुच्छ्वासाद्रुद्धा च मे वाक् ।

**अश्मकूटः** - वयस्य कथमद्य भयभीत इव संवृत्तः ।

**वज्रकूटः** - रे किं मां पृच्छसि ब्रह्माण्डभेदकः शब्दोऽपि त्वया न श्रुतः ।

**अश्मकूटः** - (तस्य मुखाग्रे कर्णं दत्वा ।) किं भणसि नाहं शृणोमि चपलावधरोष्ठौ पश्यामि ।

**वज्रकूटः** - (उच्चस्वरेण ।) ब्रह्माण्डभेदकः शब्दोऽपि त्वया न श्रुतः ।

**अश्मकूटः** - अहह तेनैव स्फुटितौ मे कर्णौ कथय भयस्य किं कारणम् ।

**वज्रकूटः** - नाहं कण्ठशोषं करोमि । कर्णनलिकां स्थापयेश्चेत्कथयिष्ये ।

**अश्मकूटः** - हुम् एवं चेन्नलिकां ग्रहीतुं गच्छामि ।

(इति निष्क्रम्य कर्णे नलिकां धृत्वा । पुनः प्रविश्य ।)

वयस्य अयमहमागतः ।

**वज्रकूटः** - (निपुणं निरीक्ष्य । सस्मितम् ।) वयस्य अद्य त्वं कर्णशुण्डः संवृत्तः ।

**अश्मकूटः** - (सभ्रूभङ्गम् ।) अलमलमस्मिन् समये ममोपहासेन कथय तावद्भयस्य निदानं नो चेत्प्रहरिष्ये । (इति प्रहारोद्योगं नाटयति।)

**वज्रकूटः** - (सभयम् ।) वयस्य अलमलमस्मिन् समये कोपेन कथयामि भयस्य निदानम् ।

**अश्मकूटः** - (सभ्रूभङ्गम् ।) हुं कथय कथय ।

**वज्रकूटः** - शृणु कथयामि । अद्य खलु महाराजेन कुमारस्य प्रह्लादस्य दृष्टं दुश्चेष्टितम् । श्रुता च परपक्षाश्रयणी वाणी । ततः क्रोधमूर्च्छितो महाराजः खड्गं ग्रहीतुं सभां समागतः गृहीतश्च सिंहासनात्खड्गः ।

**अश्मकूटः** - हुं ततस्ततः ।

**वज्रकूटः** - ततस्तद्दार्ढ्यपरिचिचीषया तं स्तम्भे ताडितवान् भग्नश्च सः ।

**अश्मकूटः** - हुं ततस्ततः ।

**वज्रकूटः** - ततस्तत्क्षणं ब्रह्माण्डभेदकः शब्दोऽभूत् । ततः क्षणान्तरे विभिन्नात्स्तम्भात्कश्चिन्नृहरिरूपो रिपुर्निस्सृतः ।

**अश्मकूटः** - हुं ततस्ततः ।

**वज्रकूटः** - ततः स महाराजं ग्रहीतुमुत्प्लुतः । महाराजस्तु तं वञ्चयित्वा गदां गृहीत्वा तमुरसि ताडितवान् । ततः परस्परं कुञ्जरशार्दूलयोरिव बहुकालं घोरतरः समरोऽभूत् ।

**अश्मकूटः** - हुं ततस्ततः ।

**वज्रकूटः** - तदा नौरिवाचला साऽचलाऽलं चचाल । प्रभाकरोऽभिभूतप्रभः प्रबभूव । सप्तापि च समुद्राश्चिरं चुक्षुभुः । इत्थंभूतानि बहूनि दुश्चिह्नानि जातानि तानि कथयितुं न शक्नोमि कम्पते मे हृदयम् ।

**अश्मकूटः** - (सभयम् ।) हन्त ततस्ततः ।

**वज्रकूटः** - ततस्स तरसोत्प्लुत्य व्याघ्रः पशुमिव महाराजं हिरण्यकशिपुं करेण धृत्वोत्सङ्गे स्थापितवान् । ततश्चाहं भयसम्भ्रान्तः पलाय्यात्रागतोऽस्मि पश्चान्न जाने किं संवृत्तम् ।

**अश्मकूटः** - अहह कष्टमभून्न जाने किं भविष्यति ।

(नेपथ्ये ।)

**दैत्येन्द्रदन्तिदलनेन बलेन साकं**
**श्रीमन्नृसिंहविजयस्समभूत्सुखाब्धिः ।।**
**देवाश्च निर्वृतिमिता दितिजाः प्रणष्टास्-**
**तुष्टाश्च भक्तमुनयो मनुजाश्च हृष्टाः ।।६७।।**

**दुश्चिह्नानि प्रणष्टानि साकं दैत्येन तत्क्षणम् ।।**
**जातं सुखमयं सर्वं शुभचिह्नैस्सुचिह्नितम् ।।६८।।**

**उभौ** - (श्रुत्वा । सभयम् ।) अहह यदनिष्टं दैत्यकुलस्य तदेव संवृत्तम् । तेनात्र न स्थातुमुचितम् ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति ब्रह्मादिभिर्देवैर्गरुडादिभिश्च पार्षदैस्साञ्जलिबन्धैः स्तूयमानोऽन्त्रमाली क्रोधाविष्टः सिंहासनस्थो भगवान्नृसिंहः ।)

**नृसिंहः** - (प्रविश्य सक्रोधाडम्बरम् । क्ष्वेडां करोति ।)

(सर्वेऽपि सभयास्साञ्जलिबन्धाः स्तुवन्ति ।)

(आकाशात्पुष्पवृष्टिर्दिव्यवाद्यध्वनिर्जयशब्दश्च ।)

**नृसिंहः** - (तथैव क्ष्वेडां करोति ।)

**ब्रह्मा** - (अपवार्य । स्वल्पस्वरेण शिवस्य कर्णे।)

**दैत्यशान्तिरभूत्क्रोधात्क्रोधशान्तिः कुतो भवेत् ।।**
**इति चिन्ताञ्चितं चेतश्चन्द्रचूड चिरं मम ।।६९।।**

**शिवः** - हुं तथ्यमुक्तं तथैवानुभवामि । (क्षणं विमृश्य ।) ब्रह्मन् मम चेतस्येवं भाति ।

**दैत्यारिदयिता साक्षाद्रमादेवी मनोहरा ।।**
**तस्या दर्शनमात्रेण क्रोधशान्तिश्च वाक्यतः ।।७०।।**

**ब्रह्मा** - हुं रहस्यमुक्तं गता मे चिन्ता । परं तामानेतुं कः प्रेषणीयः ।

**शिवः** - (पुनः क्षणं विमृश्य ।)

**शीघ्रगश्चतुरो वाग्ग्मी हितकृत्केशवप्रियः ।।**
**प्रचण्डः कामरूपोऽसौ प्रेषणीयः खगाधिपः ।।७१।।**

**ब्रह्मा** - (सहर्षम् ।) हन्त कार्यसिद्धिर्जाताऽयमेव प्रेषणीयः । तं भ्रूसंज्ञया दूरमाहूय प्रेषयतु भवान् ।

**शिवः** -

**नाहं तत्सविधे गन्ता भुजङ्गभूषणः प्रभो ।।**
**गत्वा विभूषणो न स्यां तेनान्यः प्रेष्यतां द्रुतम् ।।७२।।**

**ब्रह्मा** - (क्षणं विमृश्य ।) (स्वल्पस्वरेण ।) वत्स बृहस्पते भ्रूसंज्ञया गरुडं दूरमाहूय लोकमातरमानेतुं प्रेषय सत्वरम् ।

**ब्रहस्पतिः** - (तथा करोति ।)

(गरुडः निष्क्रम्य रमां स्कन्धे निधाय पुनः प्रविशति ।)

(प्रविश्य ।)

**रमा** - (दूरमवलोक्य सभयचकितम् ।) हन्त हन्त वैनतेय वैनतेय तिष्ठ तिष्ठ क्व गच्छसि । किमिदं भयानकतरमग्रे प्रतिभाति ।

**गरुडः** - (तत्रैव तिष्ठति ।)

**रमा** - वत्स वैनतेय पश्य पश्य ।

**दम्भोलिदम्भदमनैर्नखरैः खरैश्च**
**दंष्ट्राभिरिन्दुशकलोच्चयकान्तिहृद्भिः ।।**
**चण्डांशुचण्डनयनायुधदेहकान्त्या**
**क्रूरः स्थितोऽस्ति पुरुषः क इहार्द्धसिंहः ।।७३।।**
**ब्रह्माण्डभेदिनिनदोऽतिभयानकास्यः**
**क्रोधोद्धतोऽतिचपलः पलदिग्धदेहः ।।**

**अन्त्रावृतः किमपि सौख्यकरोऽस्ति कोऽयं**
**क्वाऽऽस्तेऽधुना जलजलोचन ईश्वरो मे ।।७४।।**

**गरुडः** - ( सस्मितम् ।) मातः अयमेव मे स्वामी ।

**रमा** - (सविस्मयम् ।) पक्षीन्द्र मैवं भण ।

**यस्याननं मकरकुण्डलकान्तिकान्तं**
**कान्तस्स एव मम कान्ततरोऽस्ति कृष्णः ।।**
**कौमोदकीदरसरोजसुदर्शनैश्च**
**लक्ष्यस्सदा जलजलोचन इन्दुवक्त्रः ।।७५।।**

**गरुडः** - (सविनयम् ।) मातस्स एवायमस्मत्प्रभुः ।

**रमा** - (ससाध्वसातिशयम् ।) वैनतेय स एवास्तु परं साम्प्रतं नाहं तत्सविधं यातुं शक्नोमि तदेहि क्षीरोदधिं गच्छावः ।

**गरुडः** - (स्वगतम् ।) हन्त किङ्करोऽहं किं करोमि नायमवसरः परावृत्य गन्तुम् । अनुल्लङ्घनीया च लोकमातुराज्ञा । (प्रकाशम् ।) अयि देवि प्रसीद प्रसीद नायमवसरः परावृत्य गन्तुं त्वं मा गा लौकिकीं चेष्टां तावदेहि प्रभोस्समीपं गच्छावः ।

**रमा** - (तथैव वदति ।)

**नृसिंहः** - (तथैव क्ष्वेडां करोति ।)

**ब्रह्मा** - वत्स बृहस्पते कथं चिरायते गरुडः ।

**बृहस्पतिः** - हुं ममाप्ययमेव विचारोऽस्ति चेतसि ।

**ब्रह्मा** - (क्षणं विमृश्य ।) (भ्रूसंज्ञया चन्द्रमाहूय ।) वत्स सोम नागताऽधुनाऽपि ते भगिनी तत्सम्मुखं गच्छ समानेया च सा सत्वरम् ।

**चन्द्रः** - यथाज्ञा पितामहस्य । (इति गमनोद्योगं नाटयति । पदान्तरं गत्वाऽवलोक्य च । सहर्षम् ।) अये इयं मे भगिनी वैनतेयस्कन्धारूढा तदुपसर्पामि । (इत्युपसर्पति ।)

**रमा** - (दूरतो भ्रातरमवलोक्य । सधैर्यम् । सहर्षम् ।) अये समागतोऽयं मे

भ्राता । (इति गरुडस्कन्धादुत्तीर्य । उच्चस्वरेण ।) भ्रातः इत इतः ।

**चन्द्रः** - (सहर्षम् ।) (सत्वरमुपसृत्य ।) अयि भगिनि त्वामनामयं पृच्छामि ।

**रमा** - (सहर्षम् ।) भ्रातस्त्वामनामयं पृच्छामि । आकस्मिकोऽयमावयोस्समागमः ।

**चन्द्रः** - नहि नहि त्वदर्थमेवागतोऽहं प्रेषितः पितामहेन त्वामानेतुं तदेहि ते भर्त्तुस्समीपं गच्छावः ।

**रमा** - (सभयम् । सलज्जम् । अधोदृष्टिः । स्वल्पस्वरेण ।) भ्रातस्तत्रागन्तुं न पारयामि । तदनुमनुतां भ्राता क्षीरोदधिं गन्तुम् ।

**चन्द्रः** - (सवात्सल्यम् । सक्रोधमिव ।) हन्त किमद्य त्वमपि मानुषीव संवृत्ता नेदमुचितं ते क्षीरोदधेः सुताया विशेषतोऽस्मद्भगिन्याः । किं वदिष्यन्ति सर्वे देवा देव्यश्च किञ्चोपहसनीयो भविष्यति ते भर्त्ता लोकैकनाथस्तदेहि प्रभोस्सविधं गच्छावः । (इति परावृत्य प्रभोः समीपं गच्छति ।)

**रमा** - वत्स वैनतेय त्वं स्वस्थानं गच्छ । (इति उक्त्वा सलज्जं सभयम् । अधोदृष्टिश्चन्द्रमनुगच्छति ।)

**चन्द्रः** - (पदान्तरं गत्वा । मुखं परावृत्य । सवात्सल्यम् ।) अयि पश्यायं प्रभुस्तदुपसर्पतु भवती ।

**रमा** - (सोत्कम्पं साञ्जलिबन्धमधोदृष्टिः प्रभोः समीपं गच्छति ।)

**चन्द्रः** - (तत्रैव तिष्ठति ।)

**गरुडः** - (पार्षदानां मध्ये तिष्ठति ।)

**नृसिंहः** - (सक्रोधाडम्बरं क्ष्वेडां करोति ।)

**रमा** - (ससाध्वसम् । सस्खलितम् । परावृत्य गच्छति ।)

**चन्द्रः** - (सत्वरं गत्वा ।) अयि केयं ते लौकिकी चेष्टा । प्रभोस्स्वरूपाभिन्ना त्वं कथमद्य मानुषीव सम्पन्ना । एह्येहि प्रभोस्समीपम् ।

**रमा** - (ससाध्वसम् ।) अयि भ्रातः प्रसीद प्रसीद पादौ ते स्पृशामि गच्छामि क्षीरोदधिम् ।

**चन्द्रः** - (स्वगतम् ।) हन्त कथं करोमि । इयमलं बिभेति । (प्रकाशम् ।) तर्ह्येहि । पितामहसमीपं तिष्ठ ।

**रमा** - (सविचारं सोत्कम्पं तथा करोति ।)

**ब्रह्मा** - (सविनयम् । नमस्कृत्य ।) मातः मत्सविधं तिष्ठ । अलमलं ते प्रभोर्दर्शने साध्वसेन ।

**रमा** - (सोत्कम्पं साञ्जलिबन्धमधोदृष्टिस्तथा करोति ।)

**ब्रह्मा** - (क्षणं विमृश्याऽपवार्य ।) वत्स बृहस्पतेऽयं प्रयासस्तु वैफल्यं प्राप्तः किं साम्प्रतं प्रतिपत्तव्यम् ।

**बृहस्पतिः** - (क्षणं विमृश्य ।)

**भगवद्भक्तवर्योऽयं मन्त्रशौण्डस्तवात्मजः ।।**
**प्रष्टव्यो नारदः शीघ्रमेतदंशे पितामह ।।७६।।**

**ब्रह्मा** - (सश्लाघम् ।) वत्स बृहस्पते सिद्धान्त उक्तः । (इति भ्रूसंज्ञया नारदमाहूय ।) वत्स मुख्यशक्तिरूपया प्रियया रमयाऽपि प्रभोर्न क्रोधशान्तिर्जाता किमधुना विधेयम् ।

**नारदः** -

**न स्त्रीजितः प्रभुः किन्तु भक्तवश्योऽनिशं गुरो ।।**
**क्रोधशान्तेस्ततो हेतुः प्रह्लादो भगवत्प्रियः ।।७७।।**

**ब्रह्मा** - (सहर्षम् । सश्लाघम् ।) साधु वत्स साधु निष्कर्ष उक्तस्त्वया । भवत्वेवमेव करणीयम् । प्रेषयामि शीघ्रं तमानेतुं तमेव गरुडम् ।

**नारदः** - हुं तथैव कर्त्तव्यम् ।

**ब्रह्मा** - वत्स तथैव प्रेषय गरुडं प्रह्लादमानेतुम् ।

**बृहस्पतिः** - (तथा करोति ।)

**गरुडः** - (पुनर्गमनोद्योगं नाटयति । पदान्तरं गत्वा ।)

**(जनान्तिकम् ।)**

हन्त अपरिचितोऽहं क्व तावदन्वेषयामि प्रह्लादम् । न पश्यामि

दैत्यबालकमपि यं पृष्ट्वापि गच्छामि । (क्षणं विमृश्य ।) भवत्वग्रे गच्छामि । (पदान्तरं गत्वा । कर्णं दत्वा।) हन्त बालकस्वरेण भगवद्भजनं शृणोमि । तदत्रैव प्रह्लादेन भवितव्यम् ।

**प्रह्लादः** - (''**कृष्ण कृष्ण**'' इत्यादि पठति ।)

(गरुडः सत्वरं नाट्येनाध्ययनशालां प्रविशति ।)

(प्रविश्य ।)

**गरुडः** - (भजननिरतं प्रह्लादमवलोक्य। सहर्षम् ।)

अयमेव प्रह्लादः ।

**तेजस्वी भगवन्नामग्रहणे निरतः शुचिः ।।**
**सानन्दो लोचनानन्दो भगवच्चिह्नचिह्नितः ।।७८।।**

**प्रह्लादः** - (गरुडमवलोक्य सहर्षं सत्वरमुत्थाय ।) अयि भगवत्प्रिय पक्षिराट् प्रणमामि ।

**गरुडः** - वत्स अभीप्सितार्थसिद्धिरस्तु ।

**प्रह्लादः** - (साञ्जलिबन्धम् ।)

**अद्य मे सफला दृष्टिर्वाणीकर्णौ खगाधिप ।।**
**समागमेन ते नूनं यत्त्वं कृष्णप्रियस्सखा ।।७९।।**

**गरुडः** - वत्स किं ब्रवीमि त्वमनन्यभक्तोऽसि तदेहि प्रभोर्दर्शनं कारयामि ।

**प्रह्लादः** - (सहर्षम् । सानन्दाश्रु ।) क्वास्ति मे प्रभुः ।

(इति करतालं दत्वा नृत्यति ।)

**गरुडः** - (स्वगतम् ।) अहो कीदृशी बालस्य सुदृढा भक्तिर्भगवति नैसर्गिकी । (प्रकाशम् ।) अलमलं वत्स प्रभोर्दर्शने कालातिक्रमेण सत्वरमेहि स्कन्धमारोह मंक्षु नयामि प्रभोस्समीपम् ।

**प्रह्लादः** - हन्त हन्त मैवं कथय ।

**त्रैलोक्यनाथपत्रं त्वं छन्दोरूपी च काश्यपः ।।**
**त्वामारोढुं न योग्योऽस्मि प्रणम्यं प्रणमाम्यहम् ।।८०।।**

(इति दण्डवत् प्रणमति ।)

**गरुडः** - (सवात्सल्यम् ।) (तमुत्थाप्य करे धृत्वा प्रभोस्समीपं गमनोद्योगं नाटयति । पदान्तरं गत्वा ।) हन्त हन्त बाल त्वं सत्वरं चलितुं न शक्नोषि । तदेहि मत्पक्षपुटे तिष्ठ सत्वरं नयामि । (इति पक्षपुटे निधाय नाट्येन सत्वरमुड्डीय गच्छति । किञ्चिदन्तरं गत्वा भूमावुत्तीर्य पक्षपुटात्प्रह्लादं भूमौ निधाय । सवात्सल्यम् ।) वत्स प्रह्लाद पश्य पश्य अयमस्माकं प्रभुः सफलीकुरु प्रभोर्दर्शनेन नेत्रे ।

**प्रह्लादः** - (साह्लादम् । सानन्दाश्रु । दर्शनं कृत्वा दण्डवत्प्रणमति ।) (पुनरुत्थाय । सहर्षं साञ्जलिबन्धम् ।)

**निस्सीमानन्दसन्दोह दयाब्धे सुखद प्रभो ।।**
**त्यक्तक्रोधं प्रसन्नं त्वां द्रष्टुमिच्छन्ति साधवः ।।८१।।**

(इति ब्रुवन्निर्भयः प्रभोस्समीपमुपसर्पति ।)

**नृसिंहः** -

**त्यक्तक्रोधोऽस्मि संवृत्तस्सुखितस्तव दर्शनात् ।।**
**हृत्तापशान्तिः सञ्जाता भक्तस्त्वं मे प्रियप्रियः ।।८२।।**

**प्रह्लादः** - (सत्वरमुपसृत्य तच्चरणकमलयमलं स्पृष्ट्वा तत्र मस्तकं निधाय दण्डवत्प्रणमति ।)

**नृसिंहः** - (सवात्सल्यम् ।) वत्स उत्तिष्ठ उत्तिष्ठ एह्येहि देहि मे दृढालिङ्गनम् ।

**प्रह्लादः** - (उत्तिष्ठति ।)

**नृसिंहः** - (तं दोर्भ्यां प्रगृह्याङ्के निधाय सप्रेम दृढमालिङ्ग्य मूर्द्ध्न्युपाघ्राय शिरसि हस्तं निधाय सस्मितं मुखमवलोक्य । सप्रेमाश्रु ।)

**भृशं क्लिष्टोऽसि वत्स त्वं गतं दुःखं तवाधुना ।।**
**सुखं भुङ्क्ष्व स्वराज्यं च स्वीयैः परिवृतोऽनिशम् ।।८३।।**

**प्रह्लादः** - (साञ्जलिबन्धम् ।)

**सदा त्वयि सदानन्दे निकटे क्लेशसंक्षयः ।।**
**सुखितोऽस्मि भृशं नित्यं राजकीयसुखेन किम् ।।८४।।**

**नृसिंह ः** - (सप्रसादम् ।) वत्स त्वमनन्यभक्तोऽसि साम्प्रतं किमिच्छसि ।

**प्रह्लादः** -

**सम्मुखस्त्वन्मुखाम्भोजं द्रष्टुमिच्छामि सौख्यदम् ।।**
**किञ्च प्रार्थयितुं शीघ्रं पूरणाय [पूरयितुं] मनोरथम् ।।८५।।**

**नृसिंहः** - यथा ते रोचते ।

**प्रह्लादः** - (अङ्कादुत्तीर्य सम्मुखः प्रभोर्मुखकमलं प्रसन्नमवलोक्य साञ्जलिबन्धम् ।)

**संयोगसुखदः शीघ्रं महालक्ष्म्या भव प्रभो ।।**
**संयोगसुखितामेनां द्रष्टुमिच्छामि सन्ततम् ।।८६।।**

**नृसिंहः** - तथैवास्तु किं ते दुर्लभम् ।

**प्रह्लादः** - (सोत्साहम् । सत्वरं महालक्ष्म्यास्समीपमुपसृत्य पादयोः प्रणमति ।

**महालक्ष्मीः** - (सवात्सल्यम् ।) वत्स चिरञ्जीव तेऽभिलषितसिद्धिरस्तु ।

**प्रह्लादः** - (साञ्जलिबन्धम् ।)

**मातस्त्रैलोक्यनाथस्य त्वमुत्सङ्गं विभूषय ।।**
**अस्तु मे लोचनानन्दो युवयोर्दर्शनात्सदा ।।८७।।**

**महालक्ष्मीः** - (सानन्दम् ।) वत्स यत्ते रोचते तदेव मह्यमपि रोचते तेन तथैवास्तु ।

(इति सवात्सल्यं प्रह्लादं करे धृत्वा प्रभोस्समीपं सत्वरं गच्छति ।)

**नृसिंहः** - (सप्रेमप्रसरम् । महालक्ष्मीं वामाङ्के प्रह्लादं दक्षिणाङ्के स्थापयति ।)

(सर्वे देवादयस्सानन्दं जयशब्दमुखराः पुष्पवृष्टिं कुर्वन्ति प्रशंसन्ति च प्रह्लादं साह्लादम् ।)

**नृसिंहः** - (सप्रेमस्मितम् ।) वत्स किमन्यदपि प्रार्थनीयमस्ति ।

**प्रह्लादः** - (साञ्जलिबन्धम् ।)

**क्लिष्टेभ्यो मत्पितुः क्लेशात्सुरेशादिभ्य इष्टद ।।**
**यथोचितान् वरान्देहि प्रणतार्त्तिहर प्रभो ।।८८।।**

**नृसिंहः** - (सवात्सल्यम् ।) साधु वत्स तथैव करिष्यामि । अयि वत्स चतुर्मुख किं तेऽभिलषितम् ।

**ब्रह्मा** -

**वेदास्साङ्गा यथार्थाश्च सत्पात्राधीतिसंस्कृताः ।।**
**सूत्रभाष्यादिसंयुक्ता वृद्धिं गच्छन्तु सन्ततम् ।।८९।।**

**नृसिंहः** - तथास्तु ।

**ब्रह्मा** - (सविनयं प्रणमति ।)

**नृसिंहः** - अय्युमाकान्त किं ते नितान्तं प्रियं करोमि ।

**शिवः** - (साञ्जलिबन्धम् ।)

**योगिनो निर्ज्वराः सन्तु ध्यायन्तो भक्तितोऽनिशम् ।।**
**निस्सीमानन्दरूपं ते सम्प्रज्ञातसमाधिना ।।९०।।**

**नृसिंहः** - तथास्तु ।

**शिवः** - (सभक्त्युन्मेषं प्रणमति ।)

**नृसिंहः** - अयि देवगुरो किं ते वाञ्छितम् ।

**बृहस्पतिः** - (साञ्जलिबन्धम् ।)

**विप्रा वेदमुखा भवन्तु सकलाश्शास्त्रज्ञतालङ्कृताः**
**षट्कर्मोदितया धियाऽऽश्रमचतुष्कप्रीतिमन्तस्तथा ।।**
**त्वद्भक्तौ निरता निरन्तरमहो वेदार्थसञ्चिन्तका**
**धर्माधर्मविचारचारुचतुरास्साचारचारप्रियाः ।।९१।।**

**नृसिंहः** - तथास्तु ।

**बृहस्पतिः** - (सभक्त्युन्मेषं प्रणमति ।)

**नृसिंहः** - वत्स नारद किं तेऽभिमतं करोमि ।

**नारदः** - (सस्मितं साञ्जलिबन्धम् ।) अयि प्रभो किमप्यभिमतं करणीयमवशिष्टमस्ति । भवतु तथापि निवेदयामि ।

**शुद्धाद्वैतमतं सभक्तिसकलं नित्यं प्रभो भूतले**
**भूयाद्भूरितरं भृशं सुखकरं त्वद्वाक्यसन्दर्शितम् ।।**

**लोकोद्धारकरं विभूषणपरं सद्वैदिकानां परं**
**भक्तानां तव रूपदर्शकमलं सच्छिक्षया शिक्षितम् ।।९२।।**

**नृसिंहः** - (सप्रसादम् ।) साधु वत्स साधु तथैवास्तु ।

**नारदः** - (सभक्त्युद्रेकं वीणां वादयन् प्रभुमभिवादयन् बहुतरं नृत्यति ।)

**नृसिंहः** - अयि देवराज किं ते प्रियं करणीयमवशिष्टम् ।

**इन्द्रः** - (सविनयं प्रणम्य साञ्जलिबन्धम् ।)

**करणीयं कृतं सर्वं नावशिष्टं गदाधर ।।**
**अथापि प्रार्थनीयं त्वां प्रार्थयामि तवाज्ञया ।।९३।।**

**त्रिलोकी सुखिता भूयात्तत्रापि च महीतलम् ।।**
**सर्वर्त्तुरससंयुक्तं यज्ञादिभिरलङ्कृतम् ।।९४।।**

**किञ्चास्तु वृक्षसस्याढ्यं पशुपक्षिजनाकुलम् ।।**
**राजानो नीतिधर्मज्ञाश्चातुर्वर्ण्यं स्वधर्मभृत् ।।९५।।**

**नृसिंहः** - देवराज त्वं निश्चिन्तो भव तथैवास्तु ।

**इन्द्रः** - (दण्डवत्प्रणमति ।)

**नृसिंहः** - अयि सोमराज किं ते प्रियं करोमि ।

**चन्द्रः** - (सभक्त्युन्मेषं सपुलकम् ।)

**नित्ये रासोत्सवे सेवा ममाऽस्तु समयोचिता ।।**
**मद्वंशं तेऽवतारेण तीर्थीकुरु महीतले ।।९६।।**

**नृसिंहः** - (साह्लादम् ।) साधु सोम साधु त्वं मन्मना असि तवाभीप्सितार्थसिद्धिरस्तु ।

**चन्द्रः** - (सानन्दाश्रु प्रणमति ।)

**महालक्ष्मीः** - (सानन्दं पश्यति ।)

**नृसिंहः** - अयि कुशीलव चित्रसेन किं ते प्रियं करोमि ।

**चित्रसेनः** - (साञ्जलिबन्धं सविनयम् ।)

**माधुर्येण सुलक्षणेन घटितं वीणादिभिः संस्कृतं**
**रागोद्रेककरं मुहुः सुखकरं सङ्गीतमत्यूर्जितम् ।।**
**अस्तु त्वद्गुणगानतानललितं धात्रीतले सन्ततं**
**वीणासुङ्गवरा जयन्तु सुदृढं छालिक्यमस्तु प्रभो ।।९७।।**

**नृसिंहः** - (सप्रसादम् ।) साधु चित्रसेन साधु सुप्रसन्नोऽहं ते तेन सङ्गीतेन तवाभिलषितमस्तु ।

**चित्रसेनः** - (सविनयं प्रणम्य सोत्साहं मनोहरं गायति ।)

**नृसिंहः** - अयि नृत्यकुशले उर्वशि किं तेऽभिलषितम् ।

**उर्वशी** - (सविनयस्मितम् ।)

**कण्ठे सङ्गीतमाधुर्यं वयस्स्थैर्यं सुचारुता ।।**
**नृत्याभिनयचातुर्यं त्वद्भक्तिश्च सदाऽस्तु मे ।।९८।।**

**नृसिंहः** - (सस्मितम् ।) तथास्तु ।

**उर्वशी** - (सविनयस्मितं प्रणमति ।)

**नृसिंहः** - (सप्रेमस्मितम् । महालक्ष्म्या मुखचन्द्रमवलोक्य सरोमाञ्चम् ।) अयि प्राणप्रिये त्वं नित्यमाप्तकामास्यथापि प्रसङ्गवशात्किमपि अभिलषितं ब्रूहि ।

**महालक्ष्मीः** - (सप्रेमकटाक्षं सस्मितं साञ्जलिबन्धं प्रेष्ठमुखकमलमवलोकयन्ती )

**अङ्गसङ्गोऽस्तु ते नित्यं सप्रेमप्रसरं प्रिय ।।**
**दुःखास्पृष्टं सदानव्यं सर्वसौख्यमतीन्द्रियम् ।।९९।।**

**नृसिंहः** - (सानन्दम् ।) अयि प्रेष्ठतमे तथैवास्तु ।

**महालक्ष्मीः** - (सानन्दाश्रु सोत्पुलकम् ।) अयि प्राणेशाहमनुगृहीतास्मि । (इति प्रभोः प्रसन्नमुखमवलोकयन्ती तिष्ठति ।)

**नृसिंहः** - अयि भद्र वैनतेय

**प्रह्लादस्य महालक्ष्म्याः प्रापणे हेतुरुत्तमः ।।**
**त्वमसि प्रेमपात्रं मे वरं वरय हृत्स्थितम् ।।१००।।**

**गरुडः** - (सभक्तिप्रणयं साञ्जलिबन्धम् ।)

**सेवनं दर्शनं भक्तिस्स्मरणं ज्ञानमुत्तमम् ।।**
**नित्यं तेऽस्तु महानन्द ब्रह्माण्डाधिपते मम ।।१०१।।**

**नृसिंहः** - साधु भद्र साधु भक्तवर्योऽसि भृत्योत्तमोऽसि । तथैवास्तु ।

**गरुडः** - (सभक्त्युन्मेषम् । दण्डवत्प्रणमति ।)

**नृसिंहः** - (एवं सर्वेभ्यो यथोचितान् वरान् दत्वा सर्वतोऽवलोक्य ।) अयि वैनतेय क्वास्ति शुक्रः ।

**गरुडः** - (सर्वतोऽवलोक्य ।) प्रभो जगदीश नात्र शुक्रं पश्यामि ।

**नृसिंहः** - हुं तर्हि सत्वरमानय ।

**गरुडः** - यथाज्ञा स्वामिनः । (इति सत्वरं निष्क्रम्य शुक्रेण सह प्रविशति ।) (अग्रतो गत्वा ।) जयतु जयतु लोकैकनाथः । प्राप्तोऽयं दैत्याचार्यः ।

**शुक्राचार्यः** - (ससाध्वसं सकम्पं साञ्जलिबन्धम् ।)

**दुष्टानिष्टविनष्टेश्च क्लिष्टशिष्टेष्टसम्पदः ।।**
**हेतुस्त्वं परमानन्द प्रणमामि जगद्गुरुम् ।।१०२।।**

(इति दण्डवत्प्रणमति ।)

**नृसिंहः** - अय्यसुराचार्य ममादेशं शृणु ।

**शुक्राचार्यः** - (साञ्जलिबन्धम् ।) आज्ञापयतु जगदीश्वरः ।

**नृसिंहः** - (सोत्साहम् ।)

**दैत्यानां दानवानां च राज्ये भूरिसुखाकरे ।।**
**प्रह्लादश्चाभिषेक्तव्यः सम्भारैरुत्तमैर्द्विज ।।१०३।।**

**शुक्राचार्यः** - (सानन्दसम्भ्रमम् ।) यदाज्ञा देवदेवस्य ।

(इति निष्क्रम्य ।)

(शण्डामर्काभ्यां विष्णुमित्रेण चानुगम्यमानस्साभिषेकसम्भारः प्रविशति ।)

(प्रविश्य अग्रतो गत्वा ।)

जयतु जयतु भक्तकल्पतरुर्नृसिंहस्सज्जोऽयं सम्भारभरः ।

(इति शुक्रादयस्सर्वे प्रणमन्ति ।)

**विष्णुमित्रः** - (सस्मितं प्रह्लादमवलोकयति ।)

**नृसिंहः** - (सानन्दम् ।) वत्स प्रह्लाद गच्छाभिषेकार्थम् ।

**प्रह्लादः** - यथाज्ञा प्रभोः । (इति तथा करोति ।)

**नृसिंहः** - अयि चतुर्मुख भवन्तस्सर्वेऽपि गच्छन्तु प्रह्लादस्याभिषेकार्थम् ।

**ब्रह्मा** - (साञ्जलिबन्धम् ।) यथाज्ञा पुरुषोत्तमस्य ।

(इति ब्रह्मादयस्सर्वेऽपि तथा कुर्वन्ति ।)

(अथाभिषिक्तः प्रह्लादोऽनर्घ्याणि वस्त्राभरणानि परिधाय गुर्वादीनां वन्दनं विधाय समाङ्गल्यमुपसर्पति। उपसृत्य प्रभोः पादपद्मयोर्मस्तकं धृत्वा प्रणमति ।)

(आकाशात्पुष्पवृष्टिः मङ्गलवाद्यध्वनिः ।)

(ब्रह्मादयस्सर्वेऽपि जयशब्दमुखराः श्रीमन्नृसिंहं प्रणमन्ति ।)

**नृसिंहः** - (सानन्दाश्रु सरोमाञ्चं तमुत्थाप्य स्वाङ्के धृत्वा मूर्द्धिन उपाघ्राय ।) वत्स चिरञ्जीव साम्प्रतं किं प्रार्थयसे ।

**प्रह्लादः** - (साञ्जलिबन्धम् ।)

**मन्मित्रं विष्णुमित्रोऽयमाचार्य उशनाः प्रभो ॥**
**ताभ्यां वरः प्रदातव्यो यदीच्छा ते कृपानिधे ॥१०४॥**

**नृसिंहः** - वत्स यथा ते रोचते तथैव करिष्यामि ।

**उभौ** - (प्रभुं प्रसादाभिमुखमवलोक्य । साञ्जलिबन्धम् ।)

**विज्ञानं तव भक्तिश्च त्वद्भक्तेः सौहृदं सदा ॥**
**वेदे तपसि निष्ठा च दृढाऽस्तु जगदीश्वर ॥१०५॥**

**नृसिंहः** - तथास्तु ।

(शुक्रादयस्सर्वेऽपि प्रणमन्ति ।)

**विष्णुमित्रः** - अयि भगवद्भक्तवर्य प्रह्लाद त्वत्प्रभावेणाद्यापवर्गोऽनेनैव देहेन सम्प्राप्तः ।

यतः ।

**पापानि च फलाकाङ्क्षा बन्धोभयमसौख्यदम् ॥**
**मालिन्यं नास्ति यत्राथ सोऽपवर्गः प्रकीर्त्तितः ॥१०६॥**

तथात्रानुभूयते ।

**शुक्राचार्यः** - सत्यमाह विष्णुमित्रः ।

**शण्डामर्क्कौ च ।**

**नृसिंहः** - अयि वत्स साम्प्रतं किमन्यत्ते प्रियं करोमि ।

**प्रह्लादः** - (सानन्दम् ।) (साञ्जलिबन्धम् ।)

**मत्पित्राऽज्ञतया त्वयि श्रमभरस्सम्पादितस्साम्प्रतं**
**त्वन्निन्दानिरतेन किञ्च मयि ते भक्तेऽघवान् सन्ततम् ॥**
**तत्सर्वं मम तुष्टये सुखनिधे द्राक् क्षम्यतां क्षम्यतां**
**भक्तिस्ते चरणाब्जयोरविरतं भक्ते गुरौ निश्चला ॥१०७॥**

**नृसिंहः** -

**त्रिभिः पूर्वैः पिता साक्षादपरैः सप्तभिस्तव ॥**
**पूतस्ते वाञ्छितं सर्वं सर्वथाऽस्तु मम प्रिय ॥१०८॥**

**प्रह्लादः** - (सानन्दं सप्रेमाश्रु साञ्जलिबन्धं प्रणम्य ।) अयि दयोदधे कृतार्थीकृतोऽहं सर्वाभीष्टदानेन तथापीदं भरतेन प्रार्थितमस्तु ।

**नृसिंहः** - वत्स भरत ते नाट्यनैपुण्येन नितरां नन्दामि तेन विशेषतः प्रह्लादस्य प्रार्थनया ते प्रसादाभिमुखोऽहं तत्त्वदभीष्टं वरं वरय ।

**सूत्रधारः** - (सभक्तिप्रसरम् । सविनयं दण्डवत्प्रणम्य । साञ्जलिबन्धम् ।)

**श्रीमद्वल्लभवंशदुग्धजलधिर्भक्त्या श्रिया विद्यया**
**धर्मेणास्य कवेः प्रभूतयशसा वंशेन वृद्धिं गतः ॥**
**अस्तु क्षोणितलेऽस्य सौख्यममितं नित्यं मनोवाञ्छितं**
**नैरुज्यं तव भक्तिरीश परमा धर्मज्ञता निश्चला ॥१०९॥**

किञ्च श्रीयुतजीवनाख्यसुकवेस्सच्छिक्षका दैशिकाश्-
शिष्या भक्तजना भवन्तु सुखिनः कीर्त्यादिवृद्धिंगताः ।।
मित्राणि स्वजनाश्च भृत्यनिचयः प्रेष्ठाः सुहृद्बान्धवाः
विद्वांसो गुणिनस्तथाश्रितजनास्स्निग्धाश्च ये सज्जनाः ।।११०।।

नृसिंहः - तथास्तु ।

(इति निष्क्रान्तास्सर्वे ।)

।। इति श्रीमन्नृसिंहविजयनाम्नि महानाटके दशमोऽङ्कः ।।

रसदृष्टिसमायुक्तनन्देन्दुमितवत्सरे ।।
कार्त्तिकस्योत्तरे कृष्णे सप्तम्यां भृगुवासरे ।।१।।
श्रीमन्नृसिंहविजयं नाटकं पूर्णतामगात् ।।
कवेर्मनोरथेनाशु यशसा सम्पदा समम् ।।२।।

